श्री भद्रकाळी स्तुतिः

श्री भद्रकाळी स्तुतिः

ब्रह्मविष्णु ऊचतुः |
नमामि त्वां विश्वकर्त्रीं परेशीं
नित्यामाद्यां सत्यविज्ञानरूपां |
वाचातीतां निर्गुणां चातिसूक्ष्मां
ज्ञानातीतां शुद्धविज्ञानगम्यां || 1 ||

पूर्णां शुद्धां विश्वरूपां सुरूपां
देवीं वंद्यां विश्ववंद्यामपि त्वां |
सर्वांतःस्थामुत्तमस्थानसंस्था-
-मीडे काळीं विश्वसंपालयित्रीं || 2 ||

मायातीतां मायिनीं वापि मायां
भीमां श्यामां भीमनेत्रां सुरेशीं |
विद्यां सिद्धां सर्वभूताशयस्था-
-मीडे काळीं विश्वसंहारकर्त्रीं || 3 ||

नो ते रूपं वेत्ति शीलं न धाम
नो वा ध्यानं नापि मंत्रं महेशि |
सत्तारूपे त्वां प्रपद्ये शरण्ये
विश्वाराध्ये सर्वलोकैकहेतुं || 4 ||

द्यौस्ते शीर्षं नाभिदेशो नभश्च
चक्षूंषि ते चंद्रसूर्यानलास्ते |
उन्मेषास्ते सुप्रबोधो दिवा च
रात्रिर्मातश्चक्षुषोस्ते निमेषं || 5 ||

वाक्यं देवा भूमिरेषा नितंबं
पादौ गुल्फं जानुजंघस्त्वधस्ते |
प्रीतिर्धर्मोऽधर्मकार्यं हि कोपः
सृष्टिर्बोधः संहृतिस्ते तु निद्रा || 6 ||

अग्निर्जिह्वा ब्राह्मणास्ते मुखाब्जं
संध्ये द्वे ते भ्रूयुगं विश्वमूर्तिः |
श्वासो वायुर्बाहवो लोकपालाः
क्रीडा सृष्टिः संस्थितिः संहृतिस्ते || 7 ||

एवंभूतां देवि विश्वात्मिकां त्वां
काळीं वंदे ब्रह्मविद्यास्वरूपां |
मातः पूर्णे ब्रह्मविज्ञानगम्ये
दुर्गेऽपारे साररूपे प्रसीद || 8 ||

इति श्रीमहाभागवते महापुराणे ब्रह्मविष्णुकृता श्री भद्रकाळी स्तुतिः |